दिनाङ्क:-11.12.2025

प्रात: - 06:55

## भारत-इटली

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां इटलीदेशस्य उपप्रधानमन्त्रिणा सममेव विदेशमन्त्रिणा एंटोनिया तजानी इत्यमुना साकं मेलनं कृतवान्। सञ्चार-तन्त्रपटले श्री मोदी उल्लिखितवान् यत् भारत-इटली देशयो: मैत्रीसम्बन्धा: सततं दृढीभूता: । श्रीमोदी प्रोक्तवान् यत् प्रमुख-क्षेत्रेषु इटली –भारतयो: संयुक्त- रणनीतिक-कार्य- योजनाया: कार्यान्वयनदिशि उभाभ्यां देशाभ्यां प्रवर्तमाना: पदक्षेपा : प्रशंसनीया: सन्ति।

## भारत-इस्राइल

नरेन्द्र-मोदी इजराइल-देशीयेन प्रधानमन्त्रिणा बेंजामिन नेतन्याहू इत्यमुना साकं दूरभाषमाध्यमेन सम्भाषणं कृतवान्। वार्तान्तर्गतं उभाभ्यां नेतृभ्यां भारत-इजराइल-रणनीतिक-प्रगति-सम्बन्धा: प्रशंसिता:। उभौ नेतारौ आतंकवादं कट्वालोचितवन्तौ। प्रधानमन्त्री कार्यालयानुसारेण उभाभ्यां पश्चिम-एशिया-स्थितौ अपि विचार-विमर्श: कृत:।

## गृहमंत्री-लोकसभा

गृहमन्त्री अमितशाह: विशेष-गहन-संशोधन-अभ्यासस्य एसआईआर इत्येतस्य समर्थने प्रोक्तवान् यत् संविधानेन निर्वाचनायोगाय मतदातृ-सूची-निर्माणस्य एकमात्रं अधिकारा: प्रदत्ता:। श्री शाह: सबलं प्रोक्तवान् यत् मतदातृ-सूच्या: विशेष-गहन- संशोधनकार्यं निर्वाचनायोगस्य उत्तरदायित्वं, एतस्य उद्देश्यं मतदातृ-सूच्या: शुद्धिकरणं वर्तते। श्री शाहेन एते विचारा: गतदिने लोकसभायां निर्वाचन-परिष्कारविषये चर्चाया: प्रत्युत्तरे प्रकटिता: ।

## अश्विनी-वैष्णव:

भारतीय-रेलयान-मन्त्रालयेन वित्तीयवर्षाय यात्रिणां सहाय्यार्थं षष्टिहस्र कोटि-रूप्यकाणां साहाय्य-राशि: समुद्घोषिता।

गतदिने लोकसभायां पूरक-प्रश्नोत्तरे रेलयानमन्त्री अश्विनी वैष्णव: प्रोक्तवान् यत् यात्रिभ्य: प्रदत्तमाना-राशि: यात्राया: प्रायश: पञ्चचत्वारिंशत् प्रतिशन्मितं वर्तते।

**<u>पुरुष-क्रिकेट्</u>**

**भारत-दक्षिण अफ्रीका देश्योः मध्ये अनुवर्तमानायाः पञ्चस्पर्धात्मिकायाः विंशतिः प्रतिविंशतिः क्रिकेट्स्पर्धा मालिकायाः द्वितीया स्पर्धा अद्य चंडीगढ़क्रीडांगणे स्पर्धिष्यते।**

**अवधेयं पञ्च स्पर्धामालिकायाः प्रथमा स्पर्धा भारतेन विजिता, एतेन भारतं स्पर्धामालिकायां एंकम्-शून्यम् इत्यन्तरालेन अग्रेसरत्वं भजते।**